**रामकृष्ण-मिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्था**

**शोधविषयः - कालापपरिभाषासूत्राणां विमर्शः**

**शोधार्थी- शुभङ्करदासः** **मार्गदर्शकः- डॉ. सुखदेवभट्टः**

---

## शोधसारः (Abstract)

व्याकरणशास्त्रे शब्दानामन्वाख्यानाय तेषां प्रक्रियाप्रतिपादनार्थं विशिष्टनियमाः सूत्राकारेण सूत्रकृद्भिः प्रकल्पिताः सन्ति। तैः सूत्रैः क्वचिदिष्टलक्ष्ये प्रवृत्या क्वचिच्चानिष्टलक्ष्येऽप्रवृत्त्या शब्दोऽनुशास्यते। ततश्च सूत्राणां प्रवृत्तिनिवृत्त्यादिनियमविधानाय परिभाषासूत्राणि परिभाषावचनानि वा शास्त्रकारैः समुद्भाव्यन्ते। परिभाषाशास्त्रं तु गुरुवद् मार्गप्रदर्शको भवति। यथा लोके जीवननिर्वाहकाले यदा वयं पथभ्रष्टा भवामः संशयापन्नाश्च स्यामः तदा प्रकृतगुरोः शरणापन्नतया प्रवृत्तिनिवृत्तिरूपेण समुपदेशेन छिन्नसंशयाः सन्तः परमलक्ष्यार्थं वयं मनुष्याः प्रवर्तामहे तथैव शास्त्रे अनियमावस्थायां सूत्राणाम् इष्टसाधनं गुरुकल्पैः परिभाषारूपवचनैः सम्भवति। समुपलभ्यन्ते हि कालापव्याकरणस्य समुपयुक्तानि नियमविधायकानि परिभाषासूत्राणि। कालापपरिभाषासूत्रपाठः, कातन्त्रपरिभाषासूत्रपाठः इति नाम्ना कालापपरिभाषासूत्राणां तालिकारूपात्मकः पाठः प्राप्यते। तासां परिभाषाणामुपरि कालापव्याकरणस्य मुख्याचार्येण दुर्गसिंहनामकवैयाकरणसिंहेन आहत्य ६७ परिभाषवचनानाम् उदाहरणार्थविचारपूर्वकं व्याख्यानात्मकः कातन्त्रपरिभाषासूत्रवृत्तिः नामको ग्रन्थः कश्चन व्यरचि। ततो भावमिश्राख्योऽपरः कालापवैयाकरणः परिभाषापाठे श्रूतानां केषाञ्चन परिभाषावचनानां वृत्तिग्रन्थं लिलेख। एतेषां कालापपरिभाषाणां कालापपरिभाषावृत्तिविचारपूर्वकं विमर्शनरूपं शोधकार्यं **कालापपरिभाषासूत्राणां विमर्शः** इति नामके प्रकृतशोधप्रबन्धे मया प्रस्तूयते। तत्र शोधप्रबन्धस्येत्थं नामकरणं कालापव्याकरणे प्रयुक्तानां परिभाषासूत्राणां कालापभिन्नेनातिप्रसिद्धेन पाणिनीयव्याकरणेन सह तुलनार्थं किञ्च कालापव्याकरणस्यैव नैकैः परिभाषावृत्तिकारैः सूत्रवृत्तिकारैश्च समुपात्तानां मतानां विश्लेषणार्थं विहितम्।

**प्रकृतशोधकार्यस्योपादेयता**

परिभाषाशास्त्राणामुपरि क्रियमाणस्यैतस्य शोधकर्मणः प्रधानं प्रयोजनं भवति परिभाषाशास्त्राणां विस्तृतज्ञानम्। क्वचिच्च परिलक्ष्यते परिभाषाणां नवीनत्वं क्वचिच्च दोषप्रसङ्ग इति दोषगुणपरिशीलनेन शोधकार्येण परिभाषाशास्त्राणां विषये सुदृढज्ञानं भवति। किञ्चास्मिन् शोधप्रबन्धे कालापव्याकरणे समुपयुक्तानां परिभाषाणां विमर्शार्थं पाणिनीयव्याकरणपाठेन सह कालापव्याकरणस्य शब्दनिर्माणप्रक्रियाया अपि बोधो भवति। अतः परिभाषाजिज्ञासवोऽस्माद्ग्रन्थात् परिभाषाशास्त्राणां ज्ञानं कर्तुमर्हा भवेयुरिति स्वल्पायासो मया विहितो वर्तते। शोधप्रबन्धस्यास्य रचनया विद्यावारिधिः इत्युपाधिलाभोऽपि भवत्यस्य कार्यस्यान्यतप्रयोजनम्।

**आश्रीयमाणा शोधशैली**

विविधासु शोधशैलीषु प्रकृते शोधकार्ये विमर्शात्मिका शोधशैली मया समाश्रिता। तत्र प्रतिपरिभाषम् आदौ परिभाषाव्याख्यानम्, परिभाषायाः स्वरूपविचारः, समासादिप्रसङ्गश्च विचारिताः। उपलब्ध्यनुसारं पाणिनिकालापोभयव्याकरणदृष्ट्या परिभाषाणामुदाहरणपुरःसरं व्याख्या समुपन्यस्ता। ततो विमर्शनामकबिन्दौ परिभाषायाः कालापपाणिनीयव्याकरणोपात्तस्वरूपविचारः, परिभाषाप्रयोजनम्, परिभाषाणां नित्यताऽनित्यताविचारः, विशिष्टाः सन्दिह्यमाना विषयाश्च विमृष्टाः।

एतद्विमर्शार्थञ्च कालापव्याकरणस्य भावमिश्रकृतकालापपरिभाषावृत्तिः, दुर्गसिंहविरचिता कालापपरिभाषासूत्रवृत्तिः, शार्ववर्मिककालापसूत्रसम्बद्धाः त्रिलोचनदासकृता कातन्त्रवृत्तिपञ्जिका, कविराजसुषेणशर्मणः कालापचन्द्र इत्यादयो ग्रन्थाः समुपाश्रिताः। पाणिनिव्याकरणस्य नागेशभट्टानां परिभाषेन्दुशेखरः, सीरदेवकृता बृहत्परिभाषावृत्तिः, पुरुषोत्तमकृता लघुपरिभाषावृत्तिः, न्यासपदमञ्जरीसहिता काशिका, वैयाकरणसिद्धान्तकौमुदीप्रभृतयो ग्रन्थाश्च आधारीकृताः।

**प्रकृतशोधप्रबन्धस्याध्यायविन्यासः**

**कालापपरिभाषासूत्राणां विमर्शः** इत्याख्येऽस्मिन् शोधप्रबन्धे मया परिभाषाणां कार्यदृष्ट्या तासां कञ्चन विभागं प्रकल्प्य पञ्चसु अध्यायेषु विमर्शनरूपं शोधकर्म समुपनिबद्धम्। तत्र प्रथमेऽध्याये अतिदेशभावार्थं प्रयुक्ताः परिभाषाः विमृष्टा वर्तन्ते। द्वितीयेऽध्याये तु ग्राह्यग्राहकभावनियामिकाः परिभाषा

यथामति चर्चिताः सन्ति। ग्रन्थस्य तृतीयाध्याये बाध्यबाधकभावाय प्रवृत्तानां परिभाषाणां विमर्शः क्रियते। चतुर्थाध्याये स्थान्यादेशसम्बन्धाः परिभाषाः समालोचिता वर्तन्ते। अस्य शोधप्रबन्धस्यान्तिमे पञ्चमेऽध्याये सामान्यनियमार्थं प्रयुक्ता अवशिष्टाः परिभाषा विमृश्यन्ते। इत्थं परिभाषाशास्त्राणां नियमप्रकारमवलम्ब्यैवेह शोधप्रबन्धेऽध्यायविन्यासो जातः।

प्रकृतविमर्शनरूपशोधकार्यस्य निदर्शनं संक्षेपेण द्वित्रैः उदाहरणैः क्रियते-

## १. गुणबाधिका वृद्धिर्भवति।

गुणबाधिका वृद्धिर्भवति इत्यसौ परिभाषा कालापव्याकरणस्यैका विशिष्टा परिभाषा विद्यते। तत्र गुणस्य बाधिका इति गुणबाधिका षष्ठीतत्पुरुषसमासोत्पन्नः शब्दोऽसौ वृद्धेः विशेषणम्। ततश्च गुणस्य बाधिका सती वृद्धिः प्रवर्तत इति परिभाषयैतया नियम्यते। शास्त्रे गुणो वृद्धिरिति पारिभाषिकशब्दौ वर्तेते। तत्राचार्यशर्ववर्मणा गुणसंज्ञाविधानाय सूत्रमुपन्यस्तम्- **अर् पूर्वे द्वे सन्ध्यक्षरे च गुणः (कालापसूत्रम् ३.८.३४)** इति सूत्रेणानेन अर् एकार ओकार इत्येतेषां त्रयाणां गुणसंज्ञा क्रियते। **आरुत्तरे च वृद्धिः (कालापसूत्रम् ३.८.३५)** इति सूत्रेण सूत्रकर्त्रा आर् ऐकार औकार इत्येषां त्रयाणां वृद्धिसंज्ञा विहिता। तथा च प्रकृतपरिभाषाद्वारेह नियमो भवति यत्र वृद्धिरादेशो भवति तत्र सा वृद्धिः गुणं प्रबाध्यैव प्रवर्तते, यत्र तु गुणस्य वृद्ध्या बाधो न भवति, अन्येन केनचिच्छास्त्रेण गुणस्य निषेधो भवति तत्र वृद्धेः निमित्तसत्त्वेऽपि वृद्धिर्न प्रवर्तते, गुणस्य वृद्ध्या बाधाभावादिति।

**उदाहरणम्**

कालापव्याकरणस्य परिभाषावृत्तिकृता भावमिश्राचार्येण अस्याः परिभाषाया उदाहरणं प्रस्तुतम् – जि जये इति धातोः अद्यतनीसंज्ञके प्रथमपुरुषैकवचनविवक्षिते दिप्रत्यये सति, अद्यतनीसंज्ञके प्रत्यये परे सति **अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु (कालापसूत्रम् ३.८.१६)** इति सूत्रेण धातोः अडागमे तस्य धातोः पूर्वं प्रयोगे, अजि द् इति स्थिते **सिजद्यतन्याम् (कालापसूत्रम् ३.२.२४)** इति शार्ववर्मिकसूत्रेण धातोः परं सिच्प्रत्ययेऽनुबन्धानामप्रयोगे सति अजि स् द् इति जाते प्राप्तस्य इडागमस्य निषेधे सति जिधातोः नाम्यन्तत्वाद् सिच्-विकरणप्रत्यये परे विद्यमानात् **नाम्यन्तयोर्धातुविकरणयोर्गुणः**

**(कालापसूत्रम् ३.५.१)** इति सूत्रेण जिधातोः अन्त्यस्य इकारस्य स्थाने एकाररूपो गुणादेशः प्राप्नोति। तं गुणं बाधित्वा जिधातोः स्वरान्तत्वात् परस्मै सिच्-विकरणे परे सत्त्वाच्च **सिचि परस्मै स्वरान्तानाम् (कालापसूत्रम् ३.६.६)** इत्यनेन सूत्रेण धातोः जकारोत्तरस्येकारस्य स्थाने ऐकारो वृद्धिरादेशो भवति, तेन अजै स् द् इति जाते **सिचः (कालापसूत्रम् ३.६.९०)** इति सूत्रेण सिच्प्रत्ययस्य ईडागमे तस्य सिचः पूर्वप्रयोगे, अजै इ स् द् इति जाते **निमित्तात् प्रत्ययविकारागमस्थः सः षत्वम् (कालापसूत्रम् ३.८.२६)** इति सूत्रेण सिच्प्रत्ययस्थसकारस्य षत्वे, अन्तिमस्य दकारस्य विरामपरकत्वाद् **वा विरामे (कालापसूत्रम् ३.६.६२)** इति सूत्रेण वैकल्पिकतकारे अजैषीत्, अजैषीद् इति रूपे सिद्धे भवतः। इह वृद्धेः गुणबाधित्वैव प्रवृत्तिः दृश्यते। प्रकृतपरिभाषाद्वारा विहितनियमानुसारेण वृद्धेः गुणबाधकतयैव प्रवृत्तिः इतीह विद्यतेऽतोऽस्मिन् वृद्धिरादेशः सम्भवति।

गुणप्रसङ्गे वृद्धिः भवतीति प्रकृतपरिभाषाकृतनियमप्रकारः। गुणस्य प्रसङ्गाभावे वृद्धिरपि न प्रवर्तते इत्यस्योदाहरणं भवति– अनुवीत्, अधुवीत् इति। तथा च नूधातोः अद्यतनीसंज्ञकप्रथमपुरुषैकवचनविवक्षायां दिप्रत्यये, धातोः अडागमे, ततः अद्यतनीविषयत्वात् सिच्प्रत्ययेऽनुबन्धस्याप्रयोगे, धातोः **इडागमोऽसार्वधातुके (कालापसूत्रम् ३.७.१)** इत्यनेन कालापसूत्रेण इडागमे तस्य सिच्प्रत्ययात्पूर्वस्मिन् प्रयोगे अ नू इ स् द् इति स्थितौ **नाम्यन्तयोर्धातुविकरणयोर्गुणः (कालापसूत्रम् ३.५.१)** इति सूत्रेण नाम्यन्तलक्षणे गुणादेशे प्राप्ते नूधातोः कुटादिगणे पाठात् **कुटादेरनिनिचद्वु (कालापसूत्रम् ३.५.२७)** इति शार्ववर्मिकसूत्रेण नाम्यन्तलक्षणगुणस्य निषेधो भवति। अतोऽत्र गुणस्य प्रसङ्गाभावाद् प्रकृतपरिभाषासहयोगेन गुणबाधिका वृद्धिरपि न प्रवर्तते। अत्र यद्यपि नूधातुः स्वरवर्णान्तः ऊकारान्तः सिच्प्रत्ययश्च धातोः परमस्तीति **सिचि परस्मै स्वरान्तानाम् (कालापसूत्रम् ३.६.६)** इति सूत्रनिर्दिष्टवृद्ध्यादेशस्य निमित्तसत्त्वेऽपि गुणविषयत्वाभावात् तद्बाधिकाया वृद्धेः प्रवृत्तिः न भवति। ततो नूधातोरूकारस्य उवादेशे, ईडागमे अनुव् इ स् ई द् इति जाते **ईटश्चेटि (कालापसूत्रम् ३.६.५३)** इति सूत्रेण सिच्प्रत्ययस्य सकारस्य लोपे अनुव् इ ई द् इति जाते **समानः सवर्णे दीर्घीभवति परश्च लोपम् (कालापसूत्रम् १.२.१)** इत्यनेन सूत्रेण इकारस्य स्थाने दीर्घादेशे ईकारे परस्य

ईकारस्य लोपे च अनुव् ई द् इति जाते, विरामपरकत्वाद् अन्त्यस्य दकारस्य विकल्पेन तकारे सर्ववर्णसंयोगे अनुवीत्, अनुवीद् इति रूपयोः निष्पत्तिः भवति।

**विमर्शः**

गुणबाधिका वृद्धिर्भवतीति प्रकृतपरिभाषासदृशी काचित्परिभाषा त्रिमुनिव्यवस्थापिते व्याकरणशास्त्रे न परिलक्षिता, इयं कालापवैयाकरणैरेव समुद्भाविता। पाणिनीयव्याकरणशास्त्रे **आद् गुणः (अष्टाध्यायी ६.१.८८)** इत्यनेन सूत्रेण अवर्णाद् अचि परे गुणादेशो विधीयते। **वृद्धिरेचि (अष्टाध्यायी ६.१.८७)** इत्यनेन सूत्रेण अवर्णाद् एच्प्रत्याहारस्थवर्णे परे वृद्धिरादेशो निर्दिष्टः। गुणादेशस्य अज्वर्णपरे विधानात् वृद्धिसूत्रस्य प्रवृत्तौ कुत्रापि अवकाशो नोपलभ्यतेऽतः येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति इति परिभाषावचनाद् गुणस्य वृद्धिः बाधको भवति, अपवादत्वाद् उत्सर्गापवादयोः अपवादशास्त्रस्यैव प्राबल्याद्। इत्थमेव **सार्वधातुकार्धधातुकयोः (अष्टाध्यायी ७.३.८४)** इत्यनेन सूत्रेण इग्लक्षणगुणस्य सार्वधातुकार्धधातुकसामान्ये परे विधानाद् यद्यपि सिचि आर्धधातुकप्रत्यये परे सति इग्लक्षणगुणादेशस्य प्राप्तिः वर्तते। तथापीह अपवादत्वेन **सिचि वृद्धिः परस्मैपदेषु (अष्टाध्यायी ७.२.१)** इति सूत्रनिर्दिष्टेन वृद्ध्यादेशेन गुणो बाध्यते। अर्थात् पाणिनीयशास्त्रेऽपि गुणस्य बाधिका वृद्धिः भवति परन्तु तदुत्सर्गापवादन्यायेन। कालापव्याकरणेऽपि इत्थमुत्सर्गापवादरूपेण गुणस्य बाधो वृद्ध्या भवितुमर्हति परन्तु गुणस्य प्रसङ्गाभावे वृद्धेरपि प्रसङ्गाभाव इत्यपूर्वव्यतिरेकनियमविधानार्थं परिभाषाया अमुष्या आवश्यकता तस्मिन् व्याकरणशास्त्रे वर्तत एव। पाणिनीयशास्त्रे तु धात्वादिषु सार्वधातुकार्धधातुकस्थले **क्ङिति च (अष्टाध्यायी १.१.५)** इति सूत्रदिशा गुणवृद्धी इत्युभयोरेव निषेधो विहितः, तथा कालापव्याकरणे सूत्रकर्त्रा न निर्दिष्टम्। तत्र **कुटादेरनिनिचट्टु (कालापसूत्रम् ३.५.२७)** इत्यनेन केवलं गुणस्यैव निषेधात् क्वचिद् वृद्धेरपि प्रतिषेध इष्यते तदर्थं परिभाषावृत्तिकारैः प्रकृतपरिभाषा समुपन्यस्ता। अस्य नियमस्य पाणिनीयतन्त्रेऽपि स्वीकारे बहुत्र दोषः प्रसज्यते। यथा- **अत उपधायाः (अष्टाध्यायी ७.२.११६), तद्धितेष्वचामादेः (अष्टाध्यायी ७.२.११७)** इत्यादिषु वृद्धेः प्रवृत्तिः न सम्भवति, तत्र गुणस्य प्राप्त्यभावात्। तथा च क्वचिदपूर्वतया वृद्धिविधानप्रसङ्गे वृद्धिकार्यमेव न स्याद् गुणस्य प्रसङ्गाभावाद् तद्बाधिकाया वृद्धेरपि प्रवृत्त्याभावादिति पाणिनीयव्याकरणरीत्या नेयं समादृता।

## २. सन्ध्यक्षराणामिदुतौ ह्रस्वादेशे

कालापव्याकरणसम्मता परिभाषेयं सन्ध्यक्षराणां स्थाने विधीयमानो यो ह्रस्वादेशः तद्विषये नियमं करोति। ह्रस्ववर्णा अकारेकारोकादिरूपेण नैके भवन्ति तेषु के वर्णाः सन्ध्यक्षराणां स्थान आदेशरूपेण भवन्तीति जिज्ञासायां परिभाषावचनमिदमाश्रियते। नियमोऽयं पाणिनीयतन्त्रस्य सूत्राष्टाध्यायीग्रन्थे सूत्ररूपेण भगवता पाणिनिना प्रत्यपादि। क्रमेणाधो विचार्यते प्रकृतपरिभाषाकृतनियमस्य उभयविधव्याकरणयोः प्रयोगवैचित्र्यम्-

**कालापव्याकरणदिशा परिभाषायाः प्रयोगः**

कालापव्याकरणस्य प्रणेता आचार्यः शर्ववर्मा स्वविरचितसूत्रग्रन्थे एकार-ऐकार-ओकार-औकार इत्येतेषां चतुर्णां वर्णानां सन्ध्यक्षरसंज्ञानिरूपणाय सूत्रं प्रावदत्- एकारादीनि सन्ध्यक्षराणि (कालापसूत्रम् १.१.८) इति। वस्तुतः एतेषाम् एकारादीनां चतुर्णां वर्णानामियं संज्ञा पूर्वाचार्यैः प्रदत्ता। अत एव प्रातिशाख्यादिप्राचीनग्रन्थेषु श्रूयन्ते- **ततश्चत्वारि सन्ध्यक्षराणि उत्तराणि**[1] इति, **सन्ध्यक्षरमवर्णलेशः पूर्वो विवृतकरणस्थितश्च**[2] इति। अत्र अकार-इकारयोः संयोगेन एकारः, अकार-उकारयोः सन्ध्या ओकारः, अकार-एकारयोः संयोगेन ऐकारः, अकार-ओकारयोः सन्धिकार्येण औकारः इतीत्थं सन्धिकारणादेषां वर्णानामुत्पत्तिहेतोः सन्ध्यक्षरसंज्ञाऽभूत्। पाणिनीयव्याकरणदिशाऽपि एतेषां सन्ध्यक्षराणीत्यन्वर्था पूर्वाचार्यसंज्ञा भवति तेषां सन्धीयमानावयवत्वाद्। ततश्चैषां चतुर्णां सन्ध्यक्षराणां स्थाने यत्र ह्रस्वादेशो विहितः तत्र के वर्णा आदेशरूपेण आगच्छन्तीति प्रश्ने प्रकृतपरिभाषया नियम्यते सन्ध्यक्षराणां स्थाने ह्रस्वादेशप्रसङ्गे इदूतौ आदेशरूपेण ग्राह्याविति।

**उदाहरणम्**

---

[1] ऋग्वेदप्रातिशाख्यम्, १.२

[2] गोपथब्राह्मणम्, १.१.२७

चित्रा गावो यस्य स इत्यर्थे समासे चित्रगो इति स्थिते **स्वरो ह्रस्वो नपुंसके (कालापसूत्रम् २.४.५२)** इति सूत्रस्य योगविभागेन गोशब्दस्यान्त्यस्य ओकारस्य स्थाने ह्रस्वादेशः प्राप्नोति, ततश्च अकारादिह्रस्ववर्णेषु सन्ध्यक्षराणामिदुतौ ह्रस्वादेशे इति परिभाषावचनद्वारा ओकारस्य स्थाने उकारो ह्रस्वादेशरूपेण भवति। तेन चित्रगुः इति रूपं सिध्यति। तथैव अतिरै इत्यत्र ऐकारस्य स्थाने प्रकृतसूत्रेण ह्रस्वादेशे कर्तव्ये प्रकृतपरिभाषासहयोगाद् ऐकारस्य स्थाने इकार आदेशो भवति, तेन अतिरि इति रूपं सिध्यति। तथैव अतिनौ इत्यत्र औकारस्य ह्रस्वादेशे विधीयमान उकार आदेशत्वेन जायत इति अतिनु इति रूपं सिध्यति।

**पाणिनीयव्याकरणदिशा नियमस्यास्य प्रयोगः**

पाणिनिव्याकरणे प्रकृतनियमस्य प्रवर्तनार्थं सूत्रकारः पाणिनिः अष्टाध्याय्यां परिभाषासूत्रं प्रणीतवान्- **एच इग्घ्रस्वादेशे (अष्टाध्यायी १.१.४८)** इति। त्रिमुनितन्त्रदिशा एच्प्रत्याहारे ए-ओ-ऐ-औ इत्येते चत्वारो वर्णाः सन्ति, इक् प्रत्याहारे इ उ ऋ ऌ इत्येते चत्वारो वर्णाश्च भवन्ति। तत्र प्रकृतपरिभाषासूत्रेण नियम्यते एचः स्थाने ह्रस्वादेशे प्राप्ते इक्-प्रत्याहारस्थौ इकारोकारौ आदेशरूपेण जायन्त इति। यथा- हेड्-धातोः णिच्यनुबन्धलोपे हेड् इ इति स्थितौ **मितां ह्रस्वः (अष्टाध्यायी ३.१.२६)** इति सूत्रद्वारा एकारस्य ह्रस्वादेशः करणीयः ततश्च अकारादिह्रस्ववर्णेषु प्राप्तेषु प्रकृतपरिभाषासहयोगाद् एकारस्य स्थाने इकारादेशः सम्भवति। तेन हिडि इत्यस्य णिजन्तत्वाद् धातुसंज्ञा भवति, ततो हिडिधातोः अनीयर्-प्रभृतिप्रत्यये कृते हिडनीयम् इत्यादिरूपाणि सिध्यन्ति। तथैव अतिनौ इत्यत्रौकारस्य ह्रस्वादेशे प्रकृतपरिभाषाबलाद् औकारस्य उकारादेशे अतिनु इति रूपं सिद्ध्यति। इत्थमेव प्रद्योशब्दस्य नपुंसकलिङ्गनिमित्तके ह्रस्वादेशे उकारो भवति ततश्च प्रद्यु इति रूपं निष्पद्यते।

**विमर्शः**

१. प्रकृतकालापपरिभाषाकृतनियमस्य पाणिनीयतन्त्रेऽपि उपलब्धिः वर्तत एव। तत्रानयोः एतावन्मात्रः भेदो वर्तते यत् त्रिमुनिव्याकरणतन्त्रे नियमस्यास्य निर्देशार्थं सूत्रकारपाणिनिः **एच इग्घ्रस्वादेशे (अष्टाध्यायी १.१.४८)** इति परिभाषासूत्रं प्रावदत्, कालापतन्त्रे तु सूत्रकृता नोक्तं परं परिभाषाकारैः परिभाषारूपेण पठितमिदं परिभाषावचनम्।

२. पाणिनीयव्याकरणे प्रत्याहारशैल्या एचः स्थाने ह्रस्वादेशविषये इक् आदेशत्वेन भवतीति नियमः कथितः। तथा च स्थानिन एज्वर्णाः चत्वारः, तत्स्थाने विधीयमाना आदेशाश्च इक्-प्रत्याहारस्थाः चत्वार इति स्थान्यादेशयोः **यथासंख्यमनुदेशः समानाम् (अष्टाध्यायी १.३.१०)** इति परिभाषासूत्रस्य प्रवृत्तौ एतेषां क्रमेणान्वये एकारस्य इकारः, ओकारस्य उकारः, ऐकारस्य ऋकारः, औकारस्य लृकारो ह्रस्वादेशो भवतीतीत्थमनिष्टापत्तिः प्रसज्यते। तथा चात्र पाणिनीयैः समाधानं प्रदीयते- नायमपूर्वविधिः, किन्तु नियमविधिरिति। यथाप्राप्तं तदेव नियम्यते प्रकृतपरिभाषासूत्रद्वारा। एकारैकारयोः पूर्वभागोऽकारः, उत्तरभाग इकारः, ओकारौकारयोश्च पूर्वांशोऽकारः, उत्तरांश उकार इति। तस्मात् प्रकृतपरिभाषाद्वारा इग्ग्रहणेन द्वयोः पूर्वांशस्याकारस्य निवृत्तौ कृतायाम् उत्तरभागसादृश्यं परिलक्ष्य एकार-ऐकारयोः इकारो ह्रस्वादेशो भवति ओकार-औकारयोश्च उकारो ह्रस्वादेशो भवतीति पाणिनीयनिकाये राद्धान्तः।

कालापव्याकरणतन्त्रे प्रत्याहारशैल्या अनाश्रयणात् साक्षाद् ह्रस्वादेशार्थम् इकारोकारौ प्रोक्तौ, ततश्चैतादृशसंशयो न भवति स्पष्टप्रतिपत्तिश्च भवति। पाणिनीयतन्त्रेऽपि शक्यमित्थं वर्णोच्चारणपूर्वकं विधानम्। परन्तु तथा कृते सति प्रत्याहारशैल्या भङ्गः स्याद्। आचार्यस्तु एकजातीयमेव सर्वत्रोपदिशतीति प्रकृतसूत्रे वर्णग्रहणं न कृतम्।

**उपसंहारः**

प्रकृतविमर्शरूपशोधकार्यस्य सार इत्थं प्रतिफलति – सर्वेषु व्याकरणशास्त्रेषु परिभाषाशास्त्राणां कार्योपयोगिदृष्ट्या प्रकल्पनं भवति। अतः कालापव्याकरणदृष्ट्या सूत्राणां भिन्नत्वाद् भिन्नरीत्या च कार्यविधानात् काश्चन नूतना विशिष्टाः परिभाषाः समुद्भाविताः। यथा – कालापव्याकरणे पाणिनीयव्याकरणस्येव इत्संज्ञा तस्य लोपः इत्यादिनियमा न विहिताः, तस्माद् अनुबन्धानां प्रयोगेषु अभावार्थं परिभाषावचनानि समाश्रीयन्ते। स्थानिवद्भावस्य विधानार्थञ्च परिभाषासूत्रमेव विहितमस्मिन् व्याकरणे। इत्थम् विशिष्टकार्योपयोगार्थं परिभाषाशास्त्राणां प्रयोगो वर्तते कालापव्याकरणेऽस्मिन्।